कात्यायनः ।
"अवीचिनरके वर्षं वसेयुः कूटसाक्षिणः ॥"* ॥
याज्ञवल्क्यः ।
"सर्वा प्रतिज्ञां यस्योचुः साक्षिणः स जयी भवेत् ।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः ॥
वर्णानां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।
तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः ॥"
गौतमः । नानृतवचने दोषो जीवनञ्चेत्तदधीनं न तु पापीयसो जीवनमिति ।
"द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तराः ॥"
तेषामिति शेषः । यत्तु ।
"साक्षिणां लिखितानाञ्च निर्द्दिष्टानाञ्च वादिनाम् ।
तेषामेकोऽन्यथावादी भेदात् सर्व्वेऽप्यसाक्षिणः ॥"
इति कात्यायनवचनम् ॥
तत्त्रयाणां तुल्यरूपाणां मध्ये एकस्याप्यन्यथावादे अपरस्य तत्तुल्यस्य तत्प्रतिपक्षतया तृतीयस्य किञ्चिद्वादित्वे तत्र भेदात् परस्परविरुद्धार्थाभिधाने भेदात् साक्षिभ्यो न निर्णय इति परम् । बृहस्पतिस्तु साक्षिद्वैधे कर्म्मनिष्ठानां ग्रहणमाह गुणिद्वैधे क्रियावतामित्यनेन । तथा ।
"साक्षिणोऽर्थिसमुद्दिष्टान् सत्सु दोषेषु दोषयेत् ।
अदुष्टं दूषयन् वादी तत्समं दण्डमर्हति ॥"
इति ॥
तत्समं विवादसमम् । सभासदादिविदितसाक्षिदूषणमेव ग्राह्यं न तु त्र्यवरादिसाक्षिभिः प्रतिपाद्यम् ॥ * ॥ अनवस्थापातादित्याह नारदः ।
"सभासदां प्रसिद्धं यल्लोकसिद्धमथापि वा ।
साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्ज्जनात् ॥
अन्यैश्च साक्षिभिः साध्ये दूषणे पूर्व्वसाक्षिणाम् ।
अनवस्था भवेद्दोषस्तेषामप्यन्यसम्भवात् ॥"
असाध्यं साधनानर्हं सिद्धत्वाद्दोषवर्ज्जनात् । अनवस्थाविरहात्तस्मात् प्रसिद्धदूषणमेव ग्राह्यम् ॥ * दूषणमाह कात्यायनः ।
"बालोऽज्ञानादसत्यात् स्त्री पापाभ्यासाच्च कूटकृत् ।
विब्रूयात् बान्धवः स्नेहात् वैरनिर्यातनादरिः ॥
यः साक्षी नैव निर्द्दिष्टो नाहूतो नैव दर्शितः ।
ब्रूयान्मिथ्येति तथ्यं वा दण्ड्यः सोऽपि नराधमः ॥"
यदुत्तरे येन क्रिया प्रदश्यते तत्राह ।
"मिथ्याक्रिया पूर्व्ववादे कारणे प्रतिवादिनः ।
प्राङ्न्याये विधिसिद्धौ तु जयपत्रं विनिर्द्दिशेत् ॥"
मिथ्योत्तरे सति पूर्व्ववादे पूर्व्ववादिनि क्रिया प्रदत्या इति शेषः ॥ * ॥ तदानीं सन्धिमाह बृहस्पतिः ।
"पूर्व्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्य्यनिर्णये ।
द्वयोरुत्तमयोः सन्धिः स्यादयःपिण्डयोरिव ॥"
उत्तापकारणमाह स एव ।
"साक्षिसभ्यविकल्पस्तु भवेद्दूयचोभयोरपि ।
दोलायमानौ यौ सन्धिं कुर्य्यातां तौ विचक्षणौ ॥"
कात्यायनः ।
"क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु ।
लेख्ये च सति वादेषु न दिव्यं न च साक्षिणः ॥
समत्वं साक्षिणां यत्र दिव्यैस्तत्र विशोधयेत् ॥"
एतत् संशयानुच्छेदे बोध्यम् । याज्ञवल्क्यः ।
"निह्नुते लिखितानेकमेकदेशे विभावितः ।
दाप्यः सर्व्वान् नृपेणार्थान्न ग्राह्यस्त्वनिवेदितः ॥"
यो लिखितानेकं सुवर्णादिकं अपलपति स एकदेशे साक्ष्यादिभिर्व्विभावितः सन् सर्व्वान् दद्यात् । यद्येकदेशविभावनेन वादिनोऽवसादमवगम्य इदमपरं मया लेखयितुं विस्मृतमिति ब्रूते स तस्मै भाषाकाले अनुपन्यस्तं न दद्यादेतच्च न केवलं वाचनिकं किन्त्वेकदेशविभावनादिजानत एवास्य तदपलापे दुःशीलत्वावधारणादपरांशेऽपि तथात्वमेव सम्भाव्यते सत्यविभावकस्यापि प्रक्रान्तविषये यथा वस्तुवादावधारणादविभावितांशेऽपि सत्यवादित्वसम्भावनमित्येवं रूपतर्कपरम्परा सम्भावना प्रत्ययानुगृहीतास्मादेव योगीश्वरवचनात् सर्व्वं दापनीयमिति निर्णयः । एवञ्च तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारदर्शिनां न दोषः । तथा च गौतमेनापि न्यायाधिगमे तर्कोऽभ्युपायः तेनापि संगृह्य यथास्थानं गमयेदित्युक्ता तस्माद्राजाचार्य्यावनिन्द्यावित्युपवंहृतम् । एवञ्चास्य न्यायस्य वादिद्वयसाधारणत्वादुभयविषयत्वं वचनानाम् । अतएव कात्यायनः ।
"यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी ।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम् ॥"
वदतां विवदतामित्यविशेषेण दर्शयति । पूर्णापि दैविकी समग्रविषयिकापि न ग्राह्या तेनैकदेशप्रतिपादिकया मानुष्या क्रियया समस्तसाध्यसिद्धिरिति । न च यद्येषां मध्ये एकमपि मया गृहीतं विभावयसि तदा सर्व्वमेव दातव्यमिति । प्रतिज्ञाविषयकत्वमेकदेशविभावितत्वं वचनस्येति जीम्लोकमतानुसारिमैथिलमतं युक्तमिति वाच्यं प्रतिज्ञाविषयत्वे ।
"अनेकार्थाभियुक्तेन सर्व्वार्थव्यपलापिना ।
विभावितैकदेशेन देयं यदभियुज्यते ॥"
इत्यनर्थकं प्रौढ़िवादेनाभियुज्य मानादधिकस्यापि प्रतिज्ञातस्य दानावश्यकत्वात् न ग्राह्यस्त्वनिवेदित इत्यपि व्यर्थं अनिवेदितस्यापि प्रागज्ञातत्वेनाप्रतिज्ञातस्य सर्व्वथैव देयत्वात् । न च विभावितैकदेशवचनं व्याप्यभूतैकदेशविषयं तस्मिंस्तु प्रतिपादिते व्यापकैकदेशप्रतीतिरनुमानात् सम्भवतीति वाच्यं विभावितैकदेशानुमितव्यापकस्यापि न्यायतोऽग्राह्यत्वे सिद्धे न ग्राह्यस्त्वनिवेदित इत्यभिधानानुपपत्तेः । एवञ्च ।
"साध्यार्थांशे निगदिते साक्षिभिः सकलं भवेत् ।
स्त्रीसङ्गे साहसे चौर्य्ये यत्साध्यं परिकल्पितम् ॥"
इति कात्यायनवचनम् ॥
तद्विषयप्रदर्शकं ऋणनिक्षेपाद्यपह्नवेऽपि योज्यमिति । यत्तु ।
"अनेकार्थाभियोगे तु यावत् संशोधयेद्धनी ।
साक्षिभिस्तावदेवासौ लभते साधितं धनम् ॥"
तद्रणाद्यनभिज्ञपुत्त्रादिविषयकम् । तथा हि नानाविधपित्रृणाद्यभियुक्तेनाजानता नाहं जानामीति उत्तरवादिना साक्ष्यादिभिर्यावद्धनं प्रतिपाद्यति तावदेव पुत्त्रेण दातव्यम् एवमेव विश्वरूपजीमूतवाहनप्रभृतयः ॥ कात्यायनः ।
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
अनिरुद्धा त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
अनुमानं प्रत्यासङ्कलितं तदाह मनुः ।
"वाह्यैर्व्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ॥"
स्वरो गद्गदादिः वर्णोऽस्वाभाविकः । इङ्गितं स्वेदवेपथुरोमाञ्चादि । आकारो विकृतः । चक्षुषा कातरेण । चेष्टितेन स्थानत्यागादिना । एषाञ्चान्यथासिद्धेर्दुर्निरूप्यत्वादेभ्यः साक्षी बलवान् इत्यर्थः ॥ * ॥ मुखनिरूप्यत्वे तु याज्ञवल्क्यः ।
"देशाद्देशान्तरं याति सृक्किणी परिलेढ़ि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक् चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि ॥
स्वभावात् विकृतिं गच्छेन्मनोवाक्कायकर्म्मभिः ।
अभियोगे च साक्ष्ये च स दुष्टः परिकीर्त्तितः ॥"
न परोक्तां वाचं प्रतिवचनेन पूजयति तथौष्ठचक्षुश्च परकीयवीक्षणेन निर्भुजति कुटिलीकरोति यदा मनोवाक्कायकर्म्मभिः स्वभावात् पूर्व्वोक्तां यथायोग्यां विकृतिं गच्छेत्तदा स दुष्ट इत्यर्थः । अतएव श्रीरामायणे ।
"आकारश्छाद्यमानोऽपि न शक्योऽसौ निगूहितुम् ।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥"
आकारो देहधर्म्मः मुखाप्रसादवैवर्ण्यरूपः ।
नारदः ।
"सुदीर्घेणापि कालेन लिखितं सिद्धिमाप्नुयात् ।
संजानन्नात्मनो लेख्यमजानंस्तु लेखयेत् ॥"
सुदीर्घेणेति संस्कारोद्बोधकलिखनसत्त्वादयं चिरेणापि साक्ष्यं दातुं शक्नोतीत्यर्थः ॥ * ॥
लिपिज्ञं स्वहस्तेन लेखयेत् तदज्ञं परहस्तेनेत्याह व्यासः ।
"अलिपिज्ञो ऋणी यः स्यात् लेखयेत् स्वमतन्तु सः ।
साक्षी वा साक्षिणान्येन सर्व्वसाक्षिसमीपगः ॥"
बृहस्पतिः ।
"मुषितं घातितं यत्र सीमायाञ्च समन्ततः ।
अकृतोऽपि भवेत् साक्षी ग्रामस्तत्र न संशयः ॥"